# Shri Dakshinasyanakshatramalastotram

# શ્રીદક્ષિણાસ્યનક્ષત્રમાલાસ્તોત્રમ્

## Document Information

Text title : dakShiNAsyanakShatramAlAstotram

File name : dakShiNAsyanakShatramAlAstotram.itx

Category : shiva, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_shiva

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીદક્ષિણાસ્યનક્ષત્રમાલાસ્તોત્રમ્

શ્રીકણ્ઠમિન્દ્વર્ભકભાસિચૂડં શ્રીજ્ઞાનદાનવ્રતબદ્ધદીક્ષમ્ ।
શ્રીશામ્બુજન્મપ્રભવાદિપૂજ્યં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૧॥

હરન્તમાનમ્રજનાનુતાપં હયેભવક્ત્રે ડિતપાદપદ્મમ્ ।
હૃદા મુનીન્દ્રૈઃ પરિચિન્ત્યમાનં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૨॥

હસ્તાબ્જરાજદ્વરપુસ્તમુદ્રામુક્તાક્ષમાલામૃતપૂર્ણકુમ્ભમ્ ।
હરિદ્ધવાકાઙ્ક્ષિતપાદસેવં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૩॥

હંસાગ્નિચન્દ્રેક્ષણમન્ધકારિમાકારનિર્ધૂતમનોજગર્વમ્ ।
હૃતાદિમાજ્ઞાનમગોદ્ભવેશં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૪॥

હત્વા પુરા કાલમખર્વગર્વં મૃકણ્ડુસૂનોઃ પરિરક્ષણં યઃ ।
ચકાર કારુણ્યવશાત્તમેનં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૫॥

હૃત્વા તમઃ સત્વરમેવ હાર્દં દત્વા ચ બોધં પરમાર્થસંસ્થમ્ ।
મોક્ષં દદાત્યાશુ નતાય યસ્તં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૬॥

હસન્મુખામ્ભોરુહમિન્દુકુન્દનીકાશદન્તાવલિશોભમાનમ્ ।
રદામ્બરાધઃકૃતપક્વબિમ્બં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥

હેલાલવાન્નિર્મિતવિશ્વવૃન્દં બાલારુણાભાઙ્ઘ્રિયુગં દયાલુમ્ ।
પશ્યન્તમુત્સઙ્ગગતં ષડાસ્યં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૮॥

હ્રીમાન્ભવેદ્દેવગુરુર્યદીયપાદાબ્જસંસેવકલોકવાચા ।
તં દિવ્યવાગ્દાનધુરીણમાશુ શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૯॥

હારાયિતાહીશમનઙ્ગગર્વભઙ્ગપ્રગલ્ભાન્પ્રણતાનશેષાન્ ।
કુર્વન્તભિષ્ટપ્રદમષ્ટમૂર્તિં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૧૦॥

હરિર્જહારાચલકન્યકા ચ યદ્વર્ષ્મણોઽર્ધં તપસા હિ પૂર્વમ્ ।
અતોઽશરીરં તમશેષસંસ્થં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૧૧॥

હન્યાદશેષં કલુષં યદઙ્ઘ્રિપૂજા પ્રદદ્યાદપિ સર્વમિષ્ટમ્ ।
તં પાર્વતીમાનસરાજહંસં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૧૨॥

હઠાદિયોગાન્ પ્રવિધાય ચિત્તસ્થૈર્યં પ્રપદ્યાઙ્ઘ્રિયુગં યદીયમ્ ।
ધ્યાયન્તિ યોગિપ્રવરા મુદા તં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૧૩॥

હિતોપદેષ્ટા દયયા નતાનાં નિસર્ગયા યો યમિનાં જવાબ્ધિ ।
ન્યગ્રોધમૂલૈકનિકેતનં તં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૧૪॥

હતારિષટ્કૈરનુભૂયમાનં નિતાન્તમાનન્દઘનસ્વરૂપમ્ ।
નતાપરાધાન્સહમાનમીશં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૧૫॥

હિત્વા ધનાપત્યકલત્રબન્ધૂન્ દત્ત્વાભયં ભૂતતતેર્દ્વિજાગ્ર્યાઃ ।
યં યાન્તિ લોકે શરણં સદા તં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૧૬॥

હૃદમ્બુજાતે વિનિવેશ્ય ચિત્તં નિરુધ્ય ચક્ષુઃપ્રમુખાક્ષવર્ગમ્ ।
ધ્યાયન્તિ યં શૈલસુતાયુતં તં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૧૭॥

હાસપ્રભાનિર્જિતભાભિમાનં પ્રાસાર્થજુષ્ટાં કવિતાં દિશન્તમ્ ।
નતોત્તમાઙ્ગેષુ કરં દધાનં શ્રીદક્ષિણાસ્યં હૃદિ ભાબયેઽહમ્ ॥ ૧૮॥

હૈય્યઙ્ગવીનં હૃદયમ્રદિમ્ના સ્વરેણ હંસં ચરણેન પદ્મમ્ ।
હસન્તમંસાગ્રલસજ્જટાલં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૧૯॥

હરેર્વિધેશ્ચૈવ વિવાદશાન્ત્યૈ લિઙ્ગાત્મના યઃ પ્રબભૂવ પૂર્વમ્ ।
તમાદિમધ્યાન્તવિહીનરૂપં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૨૦॥

હુતાશનાદિત્યમહીપ્રમુખ્યા યસ્યાષ્ટમૂર્તીર્નિજગાદ વેદઃ ।
તં સર્વલોકાવનસક્તચિત્તં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૨૧॥

હસ્ત્યન્તલક્ષ્મીમપિ દીનવર્યઃ પ્રાપ્નોતિ યત્પાદસરોજનત્યા ।
તં કલ્પવલ્લીમદભઙ્ગદક્ષં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૨૨॥

હયાગ્ર્યમારુહ્ય ગજોત્તમં વા સમેત્ય યત્પાદયુગાર્ચકાય ।
યચ્છન્તિ રાજ્યં ધરણીધવાસ્તં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૨૩॥

હવીંષિ સઞ્જુહ્વતિ ભૂસુરાગ્ર્યાઃ કાલેષુ વહ્નૌ યદનુગ્રહાર્થમ્ ।
કર્માનુગુણ્યેન ફલપ્રદં તં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૨૪॥

હેત્યા લલાટસ્થશુચેર્મહાઘવનં દહન્તં તરસૈવ મોદાત્ ।
કુર્વન્તમારાન્નતચિત્તશુદ્ધિં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૨૫॥

હેમાશ્મનોઃ સામ્યમતિં કરોતિ યત્પાદપાથોરુહસક્તચિત્તઃ ।
વૈરાગ્યદાનૈકધુરન્ધરં તં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૨૬॥

હાલાસ્યગોકર્ણમુખેષુ દિવ્યક્ષેત્રેષુ વાસં કૃપયા કરોતિ ।
યઃ પાદનમ્રોદ્ધૃતયે સદા તં શ્રીદક્ષિણાસ્યં હૃદિ ભાવયેઽહમ્ ॥ ૨૭॥

હંસેન કેનાપિ પરાદિનેમાં કૃતાં પ્રયત્નાદતિમોદતશ્ચ ।
નક્ષત્રમાલાં દધતાં નરાણાં કણ્ઠે ભવિષ્યત્યચિરાત્પરાપ્તિઃ ॥ ૨૮॥

ઇતિ શ઼ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતં શ્રીદક્ષિણાસ્યનક્ષત્રમાલાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

---

*Shri Dakshinasyanakshatramalastotram*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*